# Brahmana Krita Sarasvati Stutih

# ब्रह्मणा कृता सरस्वतीस्तुतिः

## Document Information

Text title : Brahmana Krita Sarasvati Stutih

File name : brahmaNAkRRitAsarasvatIstutiH.itx

Category : devii, devI, sarasvatI, stuti, varAhapurANa

Location : doc_devii

Proofread by : PSA Easwaran

Description/comments : varAhapurANa | adhyAya 90/9-15||

Latest update : September 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 4, 2024

*sanskritdocuments.org*

# ब्रह्मणा कृता सरस्वतीस्तुतिः

ब्रह्मोवाच ।
जयस्व सत्यसम्भूते ध्रुवे देवि वराक्षरे ।
सर्वगे सर्वजननि सर्वभूतमहेश्वरि ॥ ९॥

सर्वज्ञे त्वं वरारोहे सर्वसिद्धिप्रदायिनी ।
सिद्धिबुद्धिकरी देवि प्रसूतिः परमेश्वरि ॥ १०॥

त्वं स्वाहा त्वं स्वधा देवि त्वमुत्पत्तिर्वरानने ।
त्वमोङ्कारस्थिता देवि वेदोत्पत्तिस्त्वमेव च ॥ ११॥

देवानां दानवानां च यक्षगन्धर्वरक्षसाम् ।
पशूनां वीरुधां चापि त्वमुत्पत्तिर्वरानने ॥ १२॥

विद्या विद्येश्वरी सिद्धा प्रसिद्धा त्वं सुरेश्वरि ।
सर्वज्ञा त्वं वरारोहे सर्वसिद्धिप्रदायिनी ॥ १३॥

सर्वगा गतसन्देहा सर्वशत्रुनिबर्हिणी ।
सर्वविद्येश्वरी देवी नमस्ते स्वस्तिकारिणि ॥ १४॥

ऋतुस्नातां स्त्रियं गच्छेद्यस्त्वां स्तुत्वा वरानने ।
तस्यावश्यं भवेत् सृष्टिस्त्वत्प्रसादात् प्रजेश्वरि ।
स्वरूपा विजया भद्रा सर्वशत्रुप्रमोहिनि ॥ १५॥

इति वराहपुराणे नवतितमाध्यायान्तर्गता ब्रह्मकृता सरस्वतीस्तुतिः समाप्ता ।

वराहपुराण । अध्याय ९०/९-१५॥

varAhapurANa . adhyAya 90/9-15..

Proofread by PSA Easwaran

*Brahmana Krita Sarasvati Stutih*

pdf was typeset on September 4, 2024

Please send corrections to *sanskrit@cheerful.com*